## उत्तराधरदक्षिणादातिः । (३४/१८०३)

उत्तराधरदक्षिणशब्देभ्यः आतिः प्रत्ययो भवति अस्तातेरर्थे । उत्तरस्यां दिशि वसति उत्तराद् वसति । उत्तरादागतः । उत्तराद् रमणीयम् । अधराद् वसति । अधरादागतः । अधराद् रमणीयम् । दक्षिणाद् वसति । दक्षिणादागतः । दक्षिणाद् रमणीयम् ॥

## एनबन्यतरस्यामदूरेऽपञ्चम्याः । (३५/१९८४)

उत्तराधरदक्षिणशब्देभ्यः एनप् प्रत्ययो भवत्यन्तरस्यामस्तातेरर्थे अदूरे चेदवधिमानवधेर्भवति । विभक्तित्रये प्रकृतेऽपञ्चम्या इति पञ्चमी [1]पर्युदस्यते । तेनायं सप्तमीप्रथमान्ताद् विज्ञायते प्रत्ययः । उत्तरेण वसति, उत्तराद् वसति, उत्तरतो वसति । उत्तरेण रमणीयम्, उत्तराद् रमणीयम्, उत्तरतो रमणीयम् । अधरेण वसति, अधराद् वसति, अधस्ताद् वसति । अधरेण रमणीयम्, अधराद् रमणीयम्, अधस्ताद् रमणीयम् । दक्षिणेन वसति, दक्षिणाद् वसति, दक्षिणतो वसति । दक्षिणेन रमणीयम्, दक्षिणाद् रमणीयम्, दक्षिणतो रमणीयम् । अदूरे इति किम् ? उत्तराद् वसति । अपञ्चम्याः इति किम् ? उत्तरादागतः[2] । अपञ्चम्याः इति प्रागसेः (५.३.३१/१९७५) । असिप्रत्ययस्तु पञ्चम्यन्ताद् अपि भवति । केचिदिहोत्तरादिग्रहणं नानुवर्तयन्ति । [3]दिक्शब्दमात्रात् प्रत्ययं मन्यन्ते । पूर्वेण[4] ग्रामम् । अपरेण ग्रामम् ॥

## दक्षिणादाच् । (३६/१९८५)

अदूरे इति न स्वर्यते । अपञ्चम्याः इति वर्तते । दक्षिणशब्दात् आच्प्रत्ययो भवति अस्तातेरर्थे । दक्षिणा वसति । दक्षिणा रमणीयम् । अपञ्चम्याः इत्येव, दक्षिणत आगतः । चकारो विशेषणार्थः, अञ्चूत्तरपदाजाहियुक्ते (२.३.२९/५९५) इति ॥

## आहि च दूरे । (३७/१९८६)

दक्षिणशब्दाद् आहिः प्रत्ययो भवति अस्तातेरर्थे, चकाराद् आच्,[5] दूरे चेद् अवधिमानवधेर्भवति । दक्षिणाहि वसति, दक्षिणा वसति । दक्षिणाहि रमणीयम्, दक्षिणा रमणीयम् । दूरे इति किम् ? दक्षिणतो वसति[6] । अपञ्चम्याः इत्येव, दक्षिणत आगतः ॥

## उत्तराच्च । (३८/१९८७)

उत्तरशब्दाद् आजाही [7]प्रत्ययौ भवतः अस्तातेरर्थे दूरे चेदवधिमानवधेर्भवति । उत्तरा वसति, उत्तराहि वसति । उत्तरा रमणीयम्, उत्तराहि रमणीयम् । [8]दूरे इत्येव, उत्तरेण प्रयाति । पञ्चम्याः इत्येव, [9]उत्तरादागतः ॥

---

1. पर्युदास्यते फ, पर्युदासः क्रियते क. 2. पकारः स्वरार्थः इत्यधिकम् ब. 3. तेन इत्यधिकम् ड, दिक्शब्दे प्राप्ते क. 4. वसति इत्यधिकम् क. 5. च इत्यधिकम् फ. 6. दक्षिणात् दक्षिणेन इत्यधिकम् ड. 7. इत्येतौ इत्यधिकम् ग. 8. दूरे – प्रयाति नास्ति ड. 9. उत्तरत आगतः क.ड.